# ShrI Sharabha Sahasranamastotra 3

# શ્રીશરભસહસ્રનામસ્તોત્રમ્ ૩

## Document Information

Text title : sharabhasahasranAmastotram 3

File name : sharabhasahasranAmastotra3.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : Ravin Bhalekar

Proofread by : Ravin Bhalekar, Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Shivanamamanjari 1 Edited by S.V.Radhakrishnanji, Akashabhairavatantra adhyAya 80

Acknowledge-Permission: Mahaperiaval Trust

Latest update : August 6, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# શ્રીશરભસહસ્રનામસ્તોત્રમ્ ૩

શ્રીશિવ ઉવાચ ॥

વિનિયોગઃ-

ૐ અસ્ય શ્રી શરભસહસ્રનામસ્તોત્રમન્ત્રસ્ય,
કાલાગ્નિરુદ્રો વામદેવ ઋષિઃ, અનુષ્ટુપ્ છન્દઃ,
શ્રીશરભ-સાલુવો દેવતા, હસ્રાં બીજં, સ્વાહા શક્તિઃ, ફટ્ કીલકં,
શ્રીશરભ-સાલુવ પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

કરન્યાસ એવં હૃદયાદિન્યાસઃ ।
ૐ હસ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ । હૃદયાય નમઃ ।
ૐ હસ્રીં તર્જનીભ્યાં નમઃ । શિરસે સ્વાહા ।
ૐ હસ્રૂં મધ્યમાભ્યાં નમઃ । શિખાયૈ વષટ્ ।
ૐ હસ્રૈં અનામિકાભ્યાં નમઃ । કવચાય હું ।
ૐ હસ્રૌં કનિષ્ઠિકાભ્યાં નમઃ । નેત્રત્રયાય વૌષટ્ ।
ૐ હસ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ । અસ્ત્રાય ફટ્ ।
ૐ ભૂર્ભુવઃ સ્વરોમ્ ઇતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ॥

ક્વાકાશઃ ક્વ સમીરણઃ ક્વ દહનઃ ક્વાપઃ ક્વ વિશ્વમ્ભરઃ
ક્વ બ્રહ્મા ક્વ જનાર્દનઃ ક્વ તરણિઃ ક્વેન્દુઃ ક્વ દેવાસુરાઃ ।
કલ્પાન્તે શરભેશ્વરઃ પ્રમુદિતઃ શ્રીસિદ્ધયોગીશ્વરઃ
ક્રીડાનાટકનાયકો વિજયતે દેવો મહાસાલુવઃ ॥

લં પૃથિવ્યાદિ પઞ્ચોપચારૈઃ સમ્પૂજયેત્ ।

॥ અથ સહસ્રનામઃ ॥

શ્રીભૈરવ ઉવાચ ।

ૐ શ્રીનાથો રેણુકાનાથો જગન્નાથો જગાશ્રયઃ ।
શ્રીગુરુર્ગુરુગમ્યશ્ચ ગુરુરૂપઃ કૃપાનિધિઃ ॥ ૧॥

હિરણ્યબાહુઃ સેનાનીર્દિક્પતિસ્તરુરાટ્ હરઃ ।
હરિકેશઃ પશુપતિર્મહાન્સસ્પિઞ્જરો મૃડઃ ॥ ૨॥

ગણેશો ગણનાથશ્ચ ગણપૂજ્યો ગણાશ્રયઃ ।
વિવ્યાધી બમ્લશઃ શ્રેષ્ઠઃ પરમાત્મા સનાતનઃ ॥ ૩॥

પીઠેશઃ પીઠરૂપશ્ચ પીઠપૂજ્યઃ સુખાવહઃ ।
સર્વાધિકો જગત્કર્તા પુષ્ટેશો નન્દિકેશ્વરઃ ॥ ૪॥

ભૈરવો ભૈરવશ્રેષ્ઠો ભૈરવાયુધધારકઃ ।
આતતાયી મહારુદ્રઃ સંસારાર્કસુરેશ્વરઃ ॥ ૫॥

સિદ્ધઃ સિદ્ધિપ્રદઃ સાધ્યઃ સિદ્ધમણ્ડલપૂજિતઃ ।
ઉપવીતી મહાનાત્મા ક્ષેત્રેશો વનનાયકઃ ॥ ૬॥

બહુરૂપો બહુસ્વામી બહુપાલનકારણઃ ।
રોહિતઃ સ્થપતિઃ સૂતો વાણિજો મન્ત્રિરુન્નતઃ ॥ ૭॥

પદરૂપઃ પદપ્રાપ્તઃ પદેશઃ પદનાયકઃ ।
કક્ષેશો હુતભૂગ્ દેવો ભુવન્તિર્વારિવસ્કૃતઃ ॥ ૮॥

દૂતિક્રમો દૂતિનાથઃ શામ્ભવઃ શઙ્કરઃ પ્રભુઃ ।
ઉચ્ચૈર્ઘોષો ઘોષરૂપઃ પત્તીશઃ પાપમોચકઃ ॥ ૯॥

વીરો વીર્યપ્રદઃ શૂરો વીરેશવરદાયકઃ । var વીરેશો વરદાયકઃ
ઓષધીશઃ પઞ્ચવક્ત્રઃ કૃત્સ્નવીતો ભયાનકઃ ॥ ૧૦॥

વીરનાથો વીરરૂપો વીરહાઽઽયુધધારકઃ ।
સહમાનઃ સ્વર્ણરેતા નિવ્યાધી નિરુપપ્લવઃ ॥ ૧૧॥

ચતુરાશ્રમનિષ્ઠશ્ચ ચતુર્મૂર્તિશ્ચતુર્ભુજઃ ।
આવ્યાધિનીશઃ કકુભો નિષઙ્ગી સ્તેનરક્ષકઃ ॥ ૧૨॥

ષષ્ટીશો ઘટિકારૂપઃ ફલસઙ્કેતવર્ધકઃ ।
મન્ત્રાત્મા તસ્કરાધ્યક્ષો વઞ્ચકઃ પરિવઞ્ચકઃ ॥ ૧૩॥

નવનાથો નવાઙ્કસ્થો નવચક્રેશ્વરો વિભુઃ ।
અરણ્યેશઃ પરિચરો નિચેરુઃ સ્તાયુરક્ષકઃ ॥ ૧૪॥

વીરાવલીપ્રિયઃ શાન્તો યુદ્ધવિક્રમદર્શકઃ ।
પ્રકૃતેશો ગિરિચરઃ કુલુઞ્ચેશો ગુહેષ્ટદઃ ॥ ૧૫ ॥

પઞ્ચપઞ્ચકતત્ત્વસ્થસ્તત્ત્વાતીતસ્વરૂપકઃ ।
ભવઃ શર્વો નીલકણ્ઠઃ કપર્દી ત્રિપુરાન્તકઃ ॥ ૧૬ ॥

શ્રીમન્ત્રઃ શ્રીકલાનાથઃ શ્રેયદઃ શ્રેયવારિધિઃ ।
મુક્તકેશો ગિરિશયઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૧૭ ॥

માલાધરો મનઃશ્રેષ્ઠો મુનિમાનસહંસકઃ ।
શિપિવિષ્ટશ્ચન્દ્રમૌલિર્હંસો મીઢુષ્ટમોઽનઘઃ ॥ ૧૮ ॥

મન્ત્રરાજો મન્ત્રરૂપો મન્ત્રપુણ્યફલપ્રદઃ ।
ઊર્વ્યઃ સૂર્વ્યોદ્ભિયઃ શીભ્યઃ પ્રથમઃ પાવકાકૃતિઃ ॥ ૧૯ ॥

ગુરુમણ્ડલરૂપસ્થો ગુરુમણ્ડલકારણઃ ।
અચરસ્તારકસ્તારોઽવસ્વન્યોઽનન્તવિગ્રહઃ ॥ ૨૦ ॥

તિથિમણ્ડલરૂપશ્ચ વૃદ્ધિક્ષયવિવર્જિતઃ ।
દ્વીપ્યઃ સ્રોતસ્ય ઈશાનો ધુર્યો ગવ્યગતોદયઃ ॥ ૨૧ ॥ var ભવ્યકથોદયઃ

પ્રથમઃ પ્રથમાકારો દ્વિતીયઃ શક્તિસંયુતઃ ।
ગુણત્રય તૃતીયોઽસૌ યુગરૂપશ્ચતુર્થકઃ ॥ ૨૨ ॥

પૂર્વજોઽવરજો જ્યેષ્ઠઃ કનિષ્ઠો વિશ્વલોચનઃ ।
પઞ્ચભૂતાત્મસાક્ષીશો ઋતુઃ ષડ્ગુણભાવનઃ ॥ ૨૩ ॥

અપ્રગલ્ભો મધ્યમોર્મ્યો જઘન્યોઽજઘન્યઃ શુભઃ ।
સપ્તધાતુસ્વરૂપશ્ચાષ્ટમહાસિદ્ધિસિદ્ધિદઃ ॥ ૨૪ ॥

પ્રતિસર્પોઽનન્તરૂપો સોભ્યો યામ્યઃ સુરાશ્રયઃ । var પ્રતિસૂર્યો
નવનાથનવમીસ્થો દશદિગ્રૂપધારકઃ ॥ ૨૫ । var નવનાથો નવાર્થસ્થઃ
રુદ્ર એકાદશાકારો દ્વાદશાદિત્યરૂપકઃ ।
વન્યોઽવસાન્યઃ પૂતાત્મા શ્રવઃ કક્ષઃ પ્રતિશ્રવાઃ ॥ ૨૬ ॥

વ્યઞ્જનો વ્યઞ્જનાતીતો વિસર્ગઃ સ્વરભૂષણઃ । var વઞ્જનો વઞ્જનાતીતઃ
આશુષેણો મહાસેનો મહાવીરો મહારથઃ ॥ ૨૭ ॥

અનન્ત અવ્યય આદ્ય આદિશક્તિવરપ્રદઃ । var અનન્તો અવ્યયો આદ્યો

શ્રુતસેનઃ શ્રુતસાક્ષી કવચી વશકૃદ્વશઃ ॥ ૨૮॥

આનન્દશ્ચાદ્યસંસ્થાન આદ્યાકારણલક્ષણઃ ।
આહનન્યોऽનન્યનાથો દુન્દુભ્યો દુષ્ટનાશનઃ ॥ ૨૯॥

કર્તા કારયિતા કાર્યઃ કાર્યકારણભાવગઃ ।
ધૃષ્ણઃ પ્રમૃશ ઈડ્યાત્મા વદાન્યો વેદસમ્મતઃ ॥ ૩૦॥ var વેદવિત્તમઃ

કલનાથઃ કલાલીતઃ કાવ્યનાટકબોધકઃ ।
તીક્ષ્ણેષુપાણિઃ પ્રહિતઃ સ્વાયુધઃ શસ્ત્રવિક્રમઃ ॥ ૩૧॥ var તીક્ષ્ણેષુર્વાણીવિધૃતઃ

કાલહન્તા કાલસાધ્યઃ કાલચક્રપ્રવર્તકઃ ।
સુધન્વા સુપ્રસન્નાત્મા પ્રવિવિક્તઃ સદાગતિઃ ॥ ૩૨॥

કાલાગ્નિરુદ્રસન્દીપ્તઃ કાલાન્તકભયઙ્કરઃ ।
ખડ્ગીશઃ ખડ્ગનાથશ્ચ ખડ્ગશક્તિ પરાયણઃ ॥ ૩૩॥

ગર્વઘ્નઃ શત્રુસંહર્તા ગમાગમવિવર્જિતઃ ।
યજ્ઞકર્મફલાધ્યક્ષો યજ્ઞમૂર્તિરનાતુરઃ ॥ ૩૪॥

ઘનશ્યામો ઘનાનન્દી ઘનાધારપ્રવર્તકઃ ।
ઘનકર્તા ઘનત્રાતા ઘનબીજસમુત્થિતઃ ॥ ૩૫॥

લોપ્યો લપ્યઃ પર્ણસદ્યઃ પર્ણ્યઃ પૂર્ણઃ પુરાતનઃ ।
ઙકારસન્ધિસાધ્યાન્તો વેદવર્ણનસાઙ્ગકઃ ॥ ૩૬॥

ભૂતો ભૂતપતિર્ભૂપો ભૂધરો ભૂધરાયુધઃ ।
છન્દઃસારઃ છન્દકર્તા છન્દ અન્વયધારકઃ ॥ ૩૭॥

ભૂતસઙ્ગો ભૂતમૂર્તિર્ભૂતિહા ભૂતિભૂષણઃ ।
છત્રસિંહાસનાધીશો ભક્તચ્છત્રસમૃદ્ધિમાન્ ॥ ૩૮॥

મદનો માદકો માદ્યો મધુહા મધુરપ્રિયઃ ।
જપો જપપ્રિયો જપ્યો જપસિદ્ધિપ્રદાયકઃ ॥ ૩૯॥

જપસઙ્ખ્યો જપાકારઃ સર્વમન્ત્રજપપ્રિયઃ ।
મધુર્મધુકરઃ શૂરો મધુરો મદનાન્તકઃ ॥ ૪૦॥

ઝષરૂપધરો દેવો ઝષવૃદ્ધિવિવર્ધકઃ ।
યમશાસનકર્તા ચ સમપૂજ્યો યમાધિપઃ ॥ ૪૧॥

નિરઞ્જનો નિરાધારો નિર્લિપ્તો નિરુપાધિકઃ ।
ટઙ્કાયુધઃ શિવપ્રીતષ્ટઙ્કારો લાઙ્ગલાશ્રયઃ ॥ ૪૨॥

નિષ્પ્રપઞ્ચો નિરાકારો નિરીહો નિરુપદ્રવઃ ।
સપર્યાપ્રતિડામર્યો મન્ત્રડામરસ્થાપકઃ ॥ ૪૩॥

સત્ત્વં સત્ત્વગુણોપેતઃ સત્ત્વવિત્સત્ત્વવિત્પ્રિયઃ ।
સદાશિવોહ્યુગ્રરૂપઃ પક્ષવિક્ષિપ્તભૂધરઃ ॥ ૪૪॥

ધનદો ધનનાથશ્ચ ધનધાન્યપ્રદાયકઃ ।
“(ૐ) નમો રુદ્રાય રૌદ્રાય મહોગ્રાય ચ મીઢુષે” ॥ ૪૫॥

નાદજ્ઞાનરતો નિત્યો નાદાન્તપદદાયકઃ ।
ફલરૂપઃ ફલાતીતઃ ફલં અક્ષરલક્ષણઃ ॥ ૪૬॥

(ૐ) શ્રીં હ્રીં ક્લીં સર્વભૂતાદ્યો ભૂતિહા ભૂતિભૂષણઃ ।
રુદ્રાક્ષમાલાભરણો રુદ્રાક્ષપ્રિયવત્સલઃ ॥ ૪૭॥

રુદ્રાક્ષવક્ષા રુદ્રાક્ષરૂપો રુદ્રાક્ષભૂષણઃ ।
ફલદઃ ફલદાતા ચ ફલકર્તા ફલપ્રિયઃ ॥ ૪૮॥

ફલાશ્રયઃ ફલાલીતઃ ફલમૂર્તિર્નિરઞ્જનઃ ।
બલાનન્દો બલગ્રામો બલીશો બલનાયકઃ ॥ ૪૯॥

(ૐ) ખ્રેં ખાં ઘ્રાં હ્રાં વીરભદ્રઃ સમ્રાટ્ દક્ષમખાન્તકઃ ।
ભવિષ્યજ્ઞો ભયત્રાતા ભયકર્તા ભયારિહા ॥ ૫૦॥

વિઘ્નેશ્વરો વિઘ્નહર્તા ગુરુર્દેવશિખામણિઃ ।
ભાવનારૂપધ્યાનસ્થો ભાવાર્થફલદાયકઃ ॥ ૫૧॥

(ૐ) શ્રાં હ્રાં કલ્પિતકલ્પસ્થઃ કલ્પનાપૂરણાલયઃ ।
ભુજઙ્ગવિલસત્કણ્ઠો ભુજઙ્ગાભરણપ્રિયઃ ॥ ૫૨॥

(ૐ) હ્રીં હ્રૂં મોહનકૃત્કર્તા છન્દમાનસતોષકઃ ।
માનાતીતઃ સ્વયં માન્યો ભક્તમાનસસંશ્રયઃ ॥ ૫૩॥

નાગેન્દ્રચર્મવસનો નારસિંહનિપાતનઃ ।
રકારઃ અગ્નિબીજસ્થઃ અપમૃત્યુવિનાશનઃ ॥ ૫૪॥

(ૐ) પ્રેં પ્રેં પ્રેં પેરં હ્રાં દુષ્ટેષ્ટો મૃત્યુહા મૃત્યુપૂજિતઃ । var પ્રેં પ્રૈં પ્રોં પ્રહૃષ્ટેષ્ટઃ
વ્યક્તો વ્યક્તતમોઽવ્યક્તો રતિલાવણ્યસુન્દરઃ ॥ ૫૫॥

રતિનાથો રતિપ્રીતો નિધનેશો ધનાધિપઃ ।
રમાપ્રિયકરો રમ્યો લિઙ્ગો લિઙ્ગાત્મવિગ્રહઃ ॥ ૫૬ ॥

(ૐ) ક્ષ્રોં ક્ષ્રોં ક્ષ્રોં ક્ષ્રોં ગ્રહાકરો રત્નવિક્રયવિગ્રહઃ ।
ગ્રહકૃદ્ ગ્રહભૃદ્ ગ્રાહી ગૃહાદ્ ગૃહવિલક્ષણઃ ॥ ૫૭ ॥

“ૐ નમઃ પક્ષિરાજાય દાવાગ્નિરૂપરૂપકાય ।
ઘોરપાતકનાશાય સૂર્યમણ્ડલસુપ્રભુઃ” ॥ ૫૮ ॥ var શરભશાલ્વાય હું ફટ્

પવનઃ પાવકો વામો મહાકાલો મહાપહઃ ।
વર્ધમાનો વૃદ્ધિરૂપો વિશ્વભક્તિપ્રિયોત્તમઃ ॥ ૫૯ ॥

ૐ હૂં હૂં સર્વગઃ સર્વઃ સર્વજિત્સર્વનાયકઃ ।
જગદેકપ્રભુઃ સ્વામી જગદ્વન્દ્યો જગન્મયઃ ॥ ૬૦ ॥

સર્વાન્તરઃ સર્વવ્યાપી સર્વકર્મપ્રવર્તકઃ ।
જગદાનન્દદો જન્મજરામરણવર્જિતઃ ॥ ૬૧ ॥

સર્વાર્થસાધકઃ સાધ્યસિદ્ધિઃ સાધકસાધકઃ ।
ખટ્વાઙ્ગી નીતિમાન્સત્યો દેવતાત્માત્મસમ્ભવઃ ॥ ૬૨ ॥

હવિર્ભોક્તા હવિઃ પ્રીતો હવ્યવાહનહવ્યકૃત્ ।
કપાલમાલાભરણઃ કપાલી વિષ્ણુવલ્લભઃ ॥ ૬૩ ॥

ૐ હ્રીં પ્રવેશ રોગાય સ્થૂલાસ્થૂલવિશારદઃ । var પ્રોં વં શં શરણ્યઃ
કલાધીશસ્ત્રિકાલજ્ઞો દુષ્ટાવગ્રહકારકઃ ॥ ૬૪ ॥

(ૐ) હું હું હું હું નટવરો મહાનાટ્યવિશારદઃ ।
ક્ષમાકરઃ ક્ષમાનાથઃ ક્ષમાપૂરિતલોચનઃ ॥ ૬૫ ॥

વૃષાઙ્કો વૃષભાધીશઃ ક્ષમાસાધનસાધકઃ ।
ક્ષમાચિન્તનસુપ્રીતો વૃષાત્મા વૃષભધ્વજઃ ॥ ૬૬ ॥

(ૐ) ક્રોં ક્રોં ક્રોં ક્રોં મહાકાયો મહાવક્ષો મહાભુજઃ ।
મૂલાધારનિવાસશ્ચ ગણેશઃ સિદ્ધિદાયકઃ ॥ ૬૭ ॥

મહાસ્કન્ધો મહાગ્રીવો મહદ્વક્ત્રો મહચ્છિરઃ ।
મહદોષ્ઠો મહૌદર્યો મહાદંષ્ટ્રો મહાહનુઃ ॥ ૬૮ ॥

સુન્દરભ્રૂઃ સુનયનઃ ષટ્ ચક્રો વર્ણલક્ષણઃ । var સર્વલક્ષણઃ

મણિપૂરો મહાવિષ્ણુઃ સુલલાટઃ સુકન્ધરઃ ॥ ૬૯॥

સત્યવાક્યો ધર્મવેત્તા પ્રજાસર્જનકારણઃ । var પ્રજાસૃજનકારણઃ
સ્વાધિષ્ઠાને રુદ્રરૂપઃ સત્યજ્ઞઃ સત્યવિક્રમઃ ॥ ૭૦॥

(ૐ) ગ્લોં ગ્લોં ગ્લોં ગ્લોં મહાદેવ દ્રવ્યશક્તિસમાહિતઃ ।
કૃતજ્ઞ કૃતકૃત્યાત્મા કૃતકૃત્યઃ કૃતાગમઃ ॥ ૭૧॥

(ૐ) હં હં હં હં ગુરુરૂપો હંસમન્ત્રાર્થમન્ત્રકઃ ।
વ્રતકૃદ્ વ્રતવિચ્છ્રેષ્ઠો વ્રતવિદ્વાન્મહાવ્રતી ॥ ૭૨॥

સહસ્રારેસહસ્રાક્ષઃ વ્રતાધારો વૃતેશ્વરઃ ।
વ્રતપ્રીતો વ્રતાકારો વ્રતનિર્વાણદર્શકઃ ॥ ૭૩॥

“ૐ હ્રીં હૂં ક્લીં શ્રીં ક્લીં હ્રીં ફટ્ સ્વાહા” ।
અતિરાગી વીતરાગઃ કૈલાસેઽનાહતધ્વનિઃ ।
માયાપૂરકયન્ત્રસ્થો રોગહેતુર્વિરાગવિત્ ॥ ૭૪॥

રાગઘ્નો રાગશમનો લમ્બકાશ્યભિષિઞ્ચિનઃ । var રઞ્જકો રગવર્જિતઃ
સહસ્રદલગર્ભસ્થઃ ચન્દ્રિકાદ્રવસંયુતઃ ॥ ૭૫॥

અન્તનિષ્ઠો મહાબુદ્ધિપ્રદાતા નીતિવિત્પ્રિયઃ । var નીતિસંશ્રયઃ
નીતિકૃન્નીતિવિન્નીતિરન્તર્યાગસ્વયંસુખી ॥ ૭૬॥

વિનીતવત્સલો નીતિસ્વરૂપો નીતિસંશ્રયઃ ।
સ્વભાવો યન્ત્રસઞ્ચારસ્તન્તુરૂપોઽમલચ્છવિઃ ॥ ૭૭॥

ક્ષેત્રકર્મપ્રવીણશ્ચ ક્ષેત્રકીર્તનવર્ધનઃ । var ક્ષેત્રકર્તન
ક્રોધજિત્ક્રોધનઃ ક્રોધિજનવિત્ ક્રોધરૂપધૃત્ ॥ ૭૮॥

વિશ્વરૂપો વિશ્વકર્તા ચૈતન્યો યન્ત્રમાલિકઃ ।
મુનિધ્યેયો મુનિત્રાતા શિવધર્મધુરન્ધરઃ ॥ ૭૯॥

ધર્મજ્ઞો ધર્મસમ્બન્ધિ ધ્વાન્તઘ્નો ધ્વાન્તસંશયઃ ।
ઇચ્છાજ્ઞાનક્રિયાતીતપ્રભાવઃ પાર્વતીપતિઃ ॥ ૮૦॥

હં હં હં હં લતારૂપઃ કલ્પનાવાઞ્છિતપ્રદઃ ।
કલ્પવૃક્ષઃ કલ્પનસ્થઃ પુણ્યશ્લોકપ્રયોજકઃ ॥ ૮૧॥

પ્રદીપનિર્મલપ્રૌઢઃ પરમઃ પરમાગમઃ ।
(ૐ) જં જં જં સર્વસઙ્ક્ષોભ સર્વસંહારકારકઃ ॥ ૮૨॥

ક્રોધદઃ ક્રોધહા ક્રોધી જનહા ક્રોધકારણઃ ।
ગુણવાન્ ગુણવિચ્છ્રેષ્ઠો વીર્યવિદ્વીર્યસંશ્રયઃ ॥ ૮૩ ॥

ગુણાધારો ગુણાકારઃ સત્ત્વકલ્યાણદેશિકઃ ।
સત્વરઃ સત્ત્વવિદ્ભાવઃ સત્યવિજ્ઞાનલોચનઃ ॥ ૮૪ ॥

"ૐ હ્રાં હ્રીં હ્રૂં ક્લીં શ્રીં બ્લૂં પ્રોં ૐ હ્રીં ક્ષ્રૌં હું ફટ્ સ્વાહા"।
વીર્યાકારો વીર્યકરશ્છન્નમૂલો મહાજયઃ ।
અવિચ્છિન્નપ્રભાવશ્રી વીર્યહા વીર્યવર્ધકઃ ॥ ૮૫ ॥

કાલવિત્કાલકૃત્કાલો બલપ્રમથનો બલી ।
છિન્નપાપશ્છિન્નપાશો વિચ્છિન્નભયયાતનઃ ॥ ૮૬ ॥

મનોન્મનો મનોરૂપો વિચ્છિન્નભયનાશનઃ ।
વિચ્છિન્નસઙ્ગસઙ્કલ્પો બલપ્રમથનો બલઃ ॥ ૮૭ ॥

વિદ્યાપ્રદાતા વિદ્યેશઃ શુદ્ધબોધસદોદિતઃ ॥ var શુદ્ધબોધસુબોધિતઃ
શુદ્ધબોધવિશુદ્ધાત્મા વિદ્યામન્ત્રૈકસંશ્રયઃ ॥ ૮૮ ॥

શુદ્ધસત્વો વિશુદ્ધાન્તવિદ્યાવેદ્યો વિશારદઃ ।
Extra verse in text with variation
ગુણાધારો ગુણાકારઃ સત્ત્વકલ્યાણદેશિકાઃ ॥ ૮૯ ॥

સત્ત્વરઃ સત્ત્વસકૃઆવઃ સત્ત્વવિજ્ઞાનલોચનઃ ।
વીર્યવાન્વીર્યવિચ્છ્રેષ્ઠઃ સત્ત્વવિદ્યાવબોધકઃ ॥ ૮૯ ॥ var વીર્યવિદ્વીર્યસંશ્રયઃ

અવિનાશો નિરાભાસો વિશુદ્ધજ્ઞાનગોચરઃ ।
ૐ હ્રીં શ્રીં ઐં સૌં શિવ કુરુ કુરુ સ્વાહા ।
સંસારયન્ત્રવાહાય મહાયન્ત્રપપ્રતિને ॥ ૯૦ ॥

"નમઃ શ્રીવ્યોમસૂર્યાય મૂર્તિ વૈચિત્ર્યહેતવે" ।
જગજ્જીવો જગત્પ્રાણો જગદાત્મા જગદ્ગુરુઃ ॥ ૯૧ ॥

આનન્દરૂપનિત્યસ્થઃ પ્રકાશાનન્દરૂપકઃ ।
યોગજ્ઞાનમહારાજો યોગજ્ઞાનમહાશિવઃ ॥ ૯૨ ॥

અખણ્ડાનન્દદાતા ચ પૂર્ણાનન્દસ્વરૂપવાન્ ।
"વરદાયાવિકારાય સર્વકારણહેતવે ॥ ૯૩ ॥

કપાલિને કરાલાય પતયે પુણ્યકીર્તયે ।
અઘોરાયાગ્નિનેત્રાય દણ્ડિને ઘોરરૂપિણે ॥ ૯૪॥

ભિષગ્ગણ્યાય ચણ્ડાય અકુલીશાય શમ્ભવે ।
હૂં ક્ષું રૂં ક્લીં સિદ્ધાય્ નમઃ" ।
ઘણ્ડારવઃ સિદ્ધગણ્ડો ગજઘણ્ટાધ્વનિપ્રિયઃ ॥ ૯૫॥

ગગનાખ્યો ગજાવાસો ગરલાંશો ગણેશ્વરઃ ।
સર્વપક્ષિમૃગાકારઃ સર્વપક્ષિમૃગાધિપઃ ॥ ૯૬॥

ચિત્રો વિચિત્રસઙ્કલ્પો વિચિત્રો વિશદોદયઃ ।
નિર્ભવો ભવનાશશ્ચ નિર્વિકલ્પો વિકલ્પકૃત્ ॥ ૯૭॥

કક્ષાવિસલકઃ કર્ત્તા કોવિદઃ કાશ્મશાસનઃ । var અક્શવિત્પુલકઃ
Extra verses in text with variation
શુદ્ધબોધો વિશુદ્ધાત્મા વિદ્યામાત્રૈકસંશ્રયઃ ॥ ૯૮॥

શુદ્ધસત્ત્વો વિશુદ્ધાન્તવિદ્યાવેદ્યૌ વિશારદઃ ।
નિન્દાદ્વેષાઇકર્તા ચ નિન્દદ્વેષાપહારકઃ ॥ ૯૮॥

કાલાગ્નિરુદ્રઃ સર્વેશઃ શમરૂપઃ શમેશ્વરઃ ।
પ્રલયાનલકૃદ્ધવ્યઃ પ્રલયાનલશાસનઃ ॥ ૯૯॥

ત્રિયમ્બકોઽરિષડ્વર્ગનાશકો ધનદઃ પ્રિયઃ ।
અક્ષોભ્યઃ ક્ષોભરહિતઃ ક્ષોભદઃ ક્ષોભનાશકઃ ॥ ૧૦૦॥

"ૐ પ્રાં પ્રીં પ્રૂં પ્રૈં પ્રૌં પ્રઃ મણિમન્ત્રૌષધાદીનાં
શક્તિરૂપાય શમ્ભવે ।
અપ્રેમયાય દેવાય વષટ્ સ્વાહા સ્વધાત્મને" ।
ધ્રુમૂર્ધા દશદિગ્બાહુશ્ચન્દ્રસૂર્યાગ્નિલોચનઃ ।
પાતાલાઙ્ઘ્રિરિલાકુક્ષિઃ ખંમુખો ગગનોદરઃ ॥ ૧૦૧॥

કલાનાદઃ કલાબિન્દુઃ કલાજ્યોતિઃ સનાતનઃ ।
અલૌકિકકનોદારઃ કૈવલ્યપદદાયકઃ ॥ ૧૦૨॥

કૌલ્યઃ કુલેશઃ કુલજઃ કવિઃ કર્પૂરભાસ્વરઃ ।
કામેશ્વરઃ કૃપાસિન્ધુઃ કુશલઃ કુલભૂષણઃ ॥ ૧૦૩॥

કૌપીનવસનઃ કાન્તઃ કેવલઃ કલ્પપાદપઃ ।

કુન્દેન્દુશઙ્ખધવલો ભસ્મોદ્ધૂલિતવિગ્રહઃ ॥ ૧૦૪॥

ભસ્માભરણહૃષ્ટાત્મા દુષ્ટપુષ્ટારિસૂદનઃ । var ષડ્ભિરાવૃતઃ
સ્થાણુર્દિગમ્બરો ભર્गो ભગનેત્રભિદુજ્જ્વલઃ ॥ ૧૦૫॥

ત્રિકાગ્નિકાલઃ કાલાગ્નિરદ્વિતીયો મહાયશાઃ ।
સામપ્રિયઃ સામકર્તા સામગઃ સામગપ્રિયઃ ॥ ૧૦૬॥

ધીરોદાત્તો મહાધીરો ધૈર્યદો ધૈર્યવર્ધકઃ ।
લાવણ્યરાશિઃ સર્વજ્ઞઃ સુબુદ્ધિર્બુદ્ધિમદ્વરઃ ॥ ૧૦૭॥

તારણાશ્રયરૂપસ્થસ્તારણાશ્રયદાયકઃ ।
તારકસ્તારકસ્વામી તારણસ્તારણપ્રિયઃ ॥ ૧૦૮॥

એકતારો દ્વિતારશ્ચ તૃતીયો માતૃકાશ્રયઃ ।
એકરૂપશ્ચૈકનાથો બહુરૂપસ્વરૂપવાન્ ॥ ૧૦૯॥

લોકસાક્ષી ત્રિલોકેશસ્ત્રિગુણાતીતમૂર્તિમાન્ ।
બાલસ્તારુણ્યરૂપસ્થો વૃદ્ધરૂપપ્રદર્શકઃ ॥ ૧૧૦॥

અવસ્થાત્રયભૂતસ્થો અવસ્થાત્રયવર્જિતઃ ।
વાચ્યવાચકભાવાર્થો વાક્યાર્થપ્રિયમાનસઃ ॥ ૧૧૧॥

સોઽહં વાક્યપ્રમાણસ્થો મહાવાક્યાર્થબોધકઃ ।
પરમાણુઃ પ્રમાણસ્થઃ કોટિબ્રહ્માણ્ડનાયકઃ ॥ ૧૧૨॥

“ૐ હં હં હં હં હ્રીં વામદેવાય નમઃ” ।
કક્ષવિત્પાલકઃ કર્તા કોવિદ કામશાસનઃ ।
કપર્દી કેસરી કાલઃ કલ્પનારહિતાકૃતિઃ ॥ ૧૧૩॥

ખખેલઃ ખેચરઃ ખ્યાતઃ ખન્યવાદી ખમુદ્ગતઃ ।
ખામ્બરઃ ખણ્ડપરશુઃ ખચક્ષુઃ ખડ્ગલોચનઃ ॥ ૧૧૪॥

અખણ્ડબ્રહ્મખણ્ડશ્રીરખણ્ડજ્યોતિરવ્યયઃ ।
ષટ્ ચક્રખેલનઃ સ્રષ્ટા ષટ્જ્યોતિષટ્ગિરાર્ચિતઃ ॥ ૧૧૫॥ var ષડ્ભિરાવૃતઃ

ગરિષ્ઠો ગોપતિર્ગોપ્તા ગમ્ભીરો બ્રહ્મગોલકઃ ।
ગોવર્ધનગતિર્ગોવિદ્ ગવાવીતો ગુણાકરઃ ॥ ૧૧૬॥

ગઙ્ગધરોઽઙ્ગસઙ્ગમ્યો ગૈહ્વારો ગટ્કરાગમઃ । var ગહ્વરાગમઃ
કર્પૂરગૌરો ગૌરીશો ગૌરીગુરુગુહાશયઃ ॥ ૧૧૭॥

ધૂર્જટિઃ પિઙ્ગલજટો જટામણ્ડલમણ્ડિતઃ ।
મનોજવો જીવહેતુરન્ધકાસુરસૂદનઃ ॥ ૧૧૮॥

લોકબન્ધુઃ કલાધારઃ પાણ્ડુરઃ પ્રમથાધિપઃ । var લોકધરઃ
અવ્યક્તલક્ષણો યોગી યોગીશો યોગિપઙ્ગવઃ ॥ ૧૧૯॥

ભૂતાવાસો જનાવાસઃ સુરાવાસઃ સુમઙ્ગલઃ ।
ભવવૈદ્યો યોગિવૈદ્યૌ યોગીસિંહહૃદાસનઃ ॥ ૧૨૦॥

યુગાવાસો યુગાધીશો યુગકૃદ્યુગવન્દિતઃ ।
કિરીટાલેઢબાલેન્દુઃ મણિઙ્કુકણભૂષિતઃ ॥ ૧૨૧॥

રત્નાઙ્ગરાગો રત્નેશો રત્નરઞ્જિતપાદુકઃ ।
નવરત્નગુણોપેતકિરીટો રત્નકઞ્ચુકઃ ॥ ૧૨૨॥

નાનાવિધાનેકરત્નલસત્કુણ્ડલમણ્ડિતઃ ।
દિવ્યરત્નગણોત્કીર્ણકણ્ઠાભરણભૂષિતઃ ॥ ૧૨૩॥

નવફાલામણિર્નાસાપુટભ્રાજિતમૌક્તિકઃ ।
રત્નાઙ્ગુલીયવિલસત્કરશાખાનખપ્રભઃ ॥ ૧૨૪॥

રત્નભ્રાજદ્ધેમસૂત્રલસત્કટિતટઃ પટુઃ ।
વામાઙ્ગભાગવિલસત્પાર્વતીવીક્ષણપ્રિયઃ ॥ ૧૨૫॥

લીલાવિડ્લમ્બિતવપુર્ભક્તમાનસમન્દિરઃ ।
મન્દમન્દાર-પુષ્પૌઘલસદ્વાયુનિષેવિતઃ ॥ ૧૨૬॥

કસ્તૂરીવિલસત્ફાલોદિવ્યવેષવિરાજિતઃ ।
દિવ્યદેહપ્રભાકૂટસન્દીપિતદિગન્તરઃ ॥ ૧૨૭॥

દેવાસુરગુરુસ્તવ્યો દેવાસુરનમસ્કૃતઃ ।
હંસરાજઃ પ્રભાકૂટપુણ્ડરીકનિભેક્ષણઃ ॥ ૧૨૮॥

સર્વાશાસ્ત્રગણોપેતઃ સર્વલોકેષ્ટભૂષણઃ ।
સર્વેષ્ટદાતા સર્વેષ્ટસ્ફુરન્મઙ્ગલવિગ્રહઃ ॥ ૧૨૯॥

અવિદ્યાલેશરહિતો નાનાવિદ્યૈકસંશ્રયઃ ।
મૂર્તીભાવત્કૃપાપૂરો ભક્તેષ્ટફલપૂરકઃ ॥ ૧૩૦॥

સમ્પૂર્ણકામઃ સૌભાગ્યનિધિઃ સૌભાગ્યદાયકઃ ।

હિતૈષી હિતકૃત્સૌમ્યઃ પરાર્થૈકપ્રયોજકઃ ॥ ૧૩૧॥

શરણાગતદીનાર્તપરિત્રાણપરાયણઃ ।
વિષ્વઞ્ચિતા વષટ્ કારો ભ્રાજિષ્ણુર્ભોજનં હવિઃ ॥ ૧૩૨॥

ભોક્તા ભોજયિતા જેતા જિતારિર્જિતમાનસઃ ।
અક્ષરઃ કારણો રુદ્ધઃ શમદઃ શારદાપ્લવઃ ॥ ૧૩૩॥

આજ્ઞાપકશ્ચ ગમ્ભીરઃ કવિર્દુઃસ્વપ્નનાશનઃ । var કલિર્દુઃસ્વપ્નનાશનઃ
પઞ્ચબ્રહ્મસમુત્પત્તિઃ ક્ષેત્રજ્ઞઃ ક્ષેત્રપાલકઃ ॥ ૧૩૪॥

વ્યોમકેશો ભીમવેષો ગૌરીપતિરનામયઃ ।
ભવાબ્ધિતરણોપાયો ભગવાન્ભક્તવત્સલઃ ॥ ૧૩૫॥

વરો વરિષ્ઠસ્તેજિષ્ઠઃ પ્રિયાપ્રિયવધઃ સુધીઃ ।
યન્તાડયવિષ્ઠઃ ક્ષોદિષ્ઠો યવિષ્ઠો યમશાસનઃ ॥ ૧૩૬॥ var રવિક્રોધતિરસ્કૃતઃ

હિરણ્યગર્ભો હેમાઙ્ગો હેમરૂપો હિરણ્યદઃ ।
બ્રહ્મજ્યોતિરનાવેક્ષ્યશ્ચામુણ્ડાજનકો રવિ ॥ ૧૩૭॥

મોક્ષાર્થિજનસંસેવ્યો મોક્ષદો મોક્ષનાયકઃ ।
મહાશ્મશાનનિલયો વેદાશ્વો ભૂરથસ્થિરઃ ॥ ૧૩૮॥

મૃગવ્યાધો ધર્મધામ પ્રભિન્નસ્ફટિકઃ પ્રભઃ ।
સર્વજ્ઞઃ પરમાત્મા ચ બ્રહ્માનન્દાશ્રયો વિભુઃ ॥ ૧૩૯॥

શરભેશો મહાદેવઃ પરબ્રહ્મ સદાશિવઃ ।
સ્વરાવિકૃતિકર્તા ચ સ્વરાતીતઃ સ્વયંવિભુઃ ॥ ૧૪૦॥

સ્વર્ગતઃ સ્વર્ગતિર્દાતા નિયન્તા નિયતાશ્રયઃ ।
ભૂમિરૂપો ભૂમિકર્તા ભૂધરો ભૂધરાશ્રયઃ ॥ ૧૪૧॥

ભૂતનાથો ભૂતકર્તા ભૂતસંહારકારકઃ ।
ભવિષ્યજ્ઞો ભવત્રાતા ભવદો ભવહારકઃ ॥ ૧૪૨॥

વરદો વરદાતા ચ વરપ્રીતો વરપ્રદઃ ।
કૂટસ્થઃ કૂટરૂપશ્ચ ત્રિકૂટો મન્ત્રવિગ્રહઃ ॥ ૧૪૩॥

મન્ત્રાર્થો મન્ત્રગમ્યશ્ચ મન્ત્રેશો મન્ત્રભાગકઃ ।
સિદ્ધિમન્ત્રઃ સિદ્ધિદાતા જપસિદ્ધિસ્વભાવકઃ ॥ ૧૪૪॥

નામાતિગો નામરૂપો નામરૂપગુણાશ્રયઃ ।
ગુણકર્તા ગુણત્રાતા ગુણાતીતા ગુણરિહા ॥ ૧૪૫॥

ગુણગ્રામો ગુણાધીશઃ ગુણનિર્ગુણકારકઃ ।
અકારમાતૃકારૂપઃ અકારાતીતભાવનઃ ॥ ૧૪૬॥

પરમૈશ્વર્યદાતા ચ પરમપ્રીતિદાયકઃ ।
પરમઃ પરમાનન્દઃ પરાનન્દઃ પરાત્પરઃ ॥ ૧૪૭॥

વૈકુણ્ઠપીઠમધ્યસ્થો વૈકુણ્ઠો વિષ્ણુવિગ્રહઃ ।
કૈલાસવાસી કૈલાસે શિવરૂપઃ શિવપ્રદઃ ॥ ૧૪૮॥

જટાજૂટોદ્ભૂષિતાઙ્ગો ભસ્મધૂસરભૂષણઃ ।
દિગ્વાસાઃ દિગ્વિભાગશ્ચ દિઙ્ગતરનિવાસકઃ ॥ ૧૪૯॥

ધ્યાનકર્તા ધ્યાનમૂર્તિર્ધારણાધારણપ્રિયઃ ।
જીવન્મુક્તિપુરીનાથો દ્વાદશાન્તસ્થિતપ્રભુઃ ॥ ૧૫૦॥

તત્ત્વસ્થસ્તત્ત્વરૂપસ્થસ્તત્ત્વાતીતોઽતિતત્ત્વગઃ ।
તત્ત્વાસામ્યસ્તત્ત્વગમ્યસ્તત્ત્વાર્થસર્વદર્શકઃ ॥ ૧૫૧॥

તત્ત્વાસનસ્તત્ત્વમાર્ગસ્તત્ત્વાન્તસ્તત્ત્વવિગ્રહઃ ।
દર્શનાદતિગો દૃશ્યો દૃશ્યાતીતાતિદર્શકઃ ॥ ૧૫૨॥

દર્શનો દર્શનાતીતો ભાવનાકારરૂપધૃત્ ।
મણિપર્વતસંસ્થાનો મણિભૂષણભૂષિતઃ ॥ ૧૫૩॥

મણિપ્રીતો મણિશ્રેષ્ઠો મણિસ્થો મણિરૂપકઃ ।
ચિન્તામણિગૃહાન્તસ્થઃ સર્વચિન્તાવિવર્જિતઃ ॥ ૧૫૪॥

ચિન્તાક્રાન્તભક્તચિન્ત્યો ચિન્તનાકારચિન્તકઃ ।
અચિન્ત્યશ્ચિન્ત્યરૂપશ્ચ નિશ્ચિન્ત્યો નિશ્ચયાત્મકઃ ॥ ૧૫૫॥

નિશ્ચયો નિશ્ચયાધીશો નિશ્ચયાત્મકદર્શકઃ ।
ત્રિવિક્રમસ્ત્રિકાલજ્ઞસ્ત્રિમૂર્તિસ્ત્રિપુરાન્તકઃ ॥ ૧૫૬॥

બ્રહ્મચારી વ્રતપ્રીતો ગૃહસ્થો ગૃહવાસકઃ ।
પરમ્ધામ પરંબ્રહ્મ પરમાત્મા પરાત્પરઃ ॥ ૧૫૭॥

સર્વેશ્વરઃ સર્વમયઃ સર્વસાક્ષી વિલક્ષણઃ ।
મણિદ્વીપો દ્વીપનાથો દ્વીપાન્તો દ્વીપલક્ષણઃ ॥ ૧૫૮॥

સપ્તસાગરકર્તા ચ સપ્તસાગરનાયકઃ ।
મહીધરો મહીભર્તા મહીપાલો મહાસ્વનઃ ॥ ૧૫૯ ॥

મહીવ્યાપ્તોઽવ્યક્તરૂપઃ સુવ્યક્તો વ્યક્તભાવનઃ ।
સુવેષાઢ્યઃ સુખપ્રીતઃ સુગમઃ સુગમાશ્રયઃ ॥ ૧૬૦ ॥

તાપત્રયાગ્નિસન્તપ્તસમાહ્લાદનચન્દ્રમાઃ ।
તારણસ્તાપસારાધ્યસ્તનુમધ્યસ્તમોમહઃ ॥ ૧૬૧ ॥

પરરૂપઃ પરધ્યેયઃ પરદૈવતદૈવતઃ ।
બ્રહ્મપૂજ્યો જગત્પૂજ્યો ભક્તપૂજ્યો વરપ્રદઃ ॥ ૧૬૨ ॥

અદ્વૈતો દ્વૈતચિત્તશ્ચ દ્વૈતાદ્વૈતવિવર્જિતઃ ।
અભેદ્યઃ સર્વભેદ્યશ્ચ ભેદ્યભેદકબોધકઃ ॥ ૧૬૩ ॥

લાક્ષારસસવર્ણાભઃ પ્લવઙ્ગમપ્રિયોત્તમઃ ।
શત્રૂસમ્હારકર્તા ચ અવતારપરો હરઃ ॥ ૧૬૪ ॥

સંવિદીશઃ સંવિદાત્મા સંવિજ્ઞાનપ્રદાયકઃ ।
સંવિત્કર્તા ચ ભક્તશ્ચ સંવિદાનન્દરૂપવાન્ ॥ ૧૬૫ ॥

સંશયાતીતસંહાર્યઃ સર્વસંશયહારકઃ ।
નિઃસંશયમનોધ્યેયઃ સંશયાત્માતિદૂરગઃ ॥ ૧૬૬ ॥

શૈવમન્ત્ર શિવપ્રીતદીક્ષાશૈવસ્વભાવકઃ ।
ભૂપતિઃ ક્ષ્માકૃતો ભૂપો ભૂપભૂપત્વદાયકઃ ॥ ૧૬૭ ॥

સર્વધર્મસમાયુક્તઃ સર્વધર્મવિવર્ધકઃ ।
સર્વશાસ્તા સર્વવેદઃ સર્વવેત્તા સતૃપ્તિમાન્ ॥ ૧૬૮ ॥

ભક્તભાવાવતારશ્ચ ભુક્તિમુક્તિફલપ્રદઃ ।
ભક્તસિદ્ધાર્થસિદ્ધિશ્ચ સિદ્ધિબુદ્ધિપ્રદાયકઃ ॥ ૧૬૯ ॥

વારાણસીવાસદાતા વારાણસીવરપ્રદઃ ।
વારાણસીનાથરૂપો ગઙ્ગામસ્તકધારકઃ ॥ ૧૭૦ ॥

પર્વતાશ્રયકર્તા ચ લિઙ્ગં ત્ર્યમ્બકપર્વતઃ ।
લિઙ્ગદેહો લિઙ્ગપતિર્લિઙ્ગપૂજ્યોઽતિદુર્લભઃ ॥ ૧૭૧ ॥

રુદ્રપ્રિયો રુદ્રસેવ્ય ઉગ્રરૂપ વિરાટ્ સ્તુતઃ ।

માલારુદ્રાક્ષભૂષાઙ્ગો જપરુદ્રાક્ષતોષિતઃ ॥ ૧૭૨॥

સત્યસત્યઃ સત્યદાતા સત્યકર્તા સદાશ્રયઃ ।
સત્યસાક્ષી સત્યલક્ષ્મી લક્ષ્મ્યાતીતમનોહરઃ ॥ ૧૭૩॥

જનકો જગતામીશો જનિતા જનનિશ્ચયઃ ।
સૃષ્ટિસ્થિતઃ સૃષ્ટિરૂપી સૃષ્ટિરૂપસ્થિતિપ્રદઃ ॥ ૧૭૪॥

સંહારરૂપઃ કાલાગ્નિઃ કાલસંહારરૂપકઃ ।
સપ્તપાતાલપાદસ્થો મહદાકાશશીર્ષવાન્ ॥ ૧૭૫॥

અમૃતશ્ચામૃતાકારઃ અમૃતામૃતરૂપકઃ ।
અમૃતાકારચિત્તિસ્થઃ અમૃતોકૃવકારણઃ ॥ ૧૭૬॥

અમૃતાહારનિત્યસ્થસ્ત્વમૃતોદ્ભવરૂપવાન્ ।
અમૃતાંશોઽમૃતાધીશોઽમૃતપ્રીતિવિવર્ધનઃ ॥ ૧૭૭॥

અનિર્દેશ્યો અનિર્વાચ્યો અનઙ્ગોઽનઙ્ગસંશ્રયઃ ।
શ્રયેદઃ શ્રેયો રૂપશ્ચ શ્રેયોઽતીતફલોત્તમઃ ॥ ૧૭૮॥

સારઃ સંસારસાક્ષી ચ સારાસારવિચક્ષણઃ ।
ધારણાતીતભાવસ્થો ધારણાન્વયગોચરઃ ॥ ૧૭૯॥

ગોચરો ગોચરાતીતઃ અતીવ પ્રિયગોચરઃ ।
પ્રિયપ્રિયઃ તથા સ્વાર્થી સ્વાર્થઃ સ્વાર્થફલપ્રદઃ ॥ ૧૮૦॥

અર્થાર્થસાક્ષી લક્ષાંશો લક્ષ્યલક્ષણવિગ્રહઃ ।
જગદીશો જગત્ત્રાતા જગન્મયો જગદ્ગુરુઃ ॥ ૧૮૧॥

ગુરુમૂર્તિઃ સ્વયંવેદ્યો વેદ્યવેદકરૂપકઃ ।
રૂપાપીતો રૂપકર્તા સર્વરૂપાર્થદાયકઃ ॥ ૧૮૨॥

અર્થદસ્ત્વર્થમાન્યચ અર્થાર્થી અર્થદાયકઃ ।
વિભવો વૈભવઃ શ્રેષ્ઠઃ સર્વવૈભવાદાયકઃ ॥ ૧૮૩॥

ચતુઃષષ્ટિકલાસૂત્રઃ ચતુઃષષ્ટિકલામયઃ ।
પુરાણશ્રવણાકારઃ પુરાણપુરુષોત્તમઃ ॥ ૧૮૪॥

પુરાતનપુરાખ્યાતઃ પૂર્વજઃ પૂર્વપૂર્વકઃ ।
મન્ત્રતન્ત્રાર્થસર્વજ્ઞઃ સર્વતન્ત્રપ્રકાશકઃ ॥ ૧૮૫॥

તન્ત્રવેતા તન્ત્રકર્તા તન્ત્રાતરનિવાસકઃ ।
તન્ત્રગમ્યસ્તન્ત્રમાન્યસ્તન્ત્રયન્ત્રફલપ્રદઃ ॥ ૧૮૬ ॥

સર્વતન્ત્રાર્થતત્ત્વજ્ઞસ્તન્ત્રરાજઃ સ્વતન્ત્રકઃ ।
બ્રહ્માણ્ડકોટિકર્તા ચ બ્રહ્માણ્ડોદરપૂરકઃ ॥ ૧૮૭ ॥

બ્રહ્માણ્ડદેશદાતા ચ બ્રહ્મજ્ઞાનપરાયણઃ ।
સ્વયમ્ભૂઃ શમ્ભુરૂપશ્ચ હંસવિગ્રહનિસ્પૃહઃ ॥ ૧૮૮ ॥

શ્વાસિનિઃ શ્વાસ ઉચ્છ્વાસઃ સર્વસંશયહારકઃ ।
સોઽહંરૂપસ્વભાવશ્ચ સોઽહંરૂપપ્રદર્શકઃ ॥ ૧૮૯ ॥

સોઽહમસ્મીતિ નિત્યસ્થઃ સોઽહં હંસઃ સ્વરૂપવાન્ ।
હંસોહંસઃ સ્વરૂપશ્ચ હંસવિગ્રહનિઃસ્પૃહઃ ।
શ્વાસનિઃશ્વાસૌચ્છ્વાસઃ પક્ષિરાજો નિરઞ્જનઃ ॥ ૧૯૦ ॥

॥ ફલશ્રુતિ ॥

અષ્ટાધિકસહસ્રં તુ નામ સાહસ્રમુત્તમમ્ ।
નિત્યં સઙ્કીર્તનાસક્તઃ કીર્તયેત્પુણ્યવાસરે ॥ ૧૯૧ ॥

સઙ્ક્રાતૌ વિષુવે ચૈવ પૌર્ણમાસ્યાં વિશેષતઃ ।
અમાવસ્યાં રવિવારે ત્રિઃસપ્તવારપાઠકઃ ॥ ૧૯૨ ॥

સ્વપ્ને દર્શનમાપ્નોતિ કાર્યાકાર્યેઽપિ દૃશ્યતે ।
રવિવારે દશાવૃત્યા રોગનાશો ભવિષ્યતિ ॥ ૧૯૩ ॥

સર્વદા સર્વકામાર્થી જપેદેતત્તુ સર્વદા ।
યસ્ય સ્મરણ માત્રેણ વૈરિણાં કુલનાશનમ્ ॥ ૧૯૪ ॥

ભોગમોક્ષપ્રદં શ્રેષ્ઠં ભુક્તિમુક્તિફલપ્રદમ્ ।
સર્વપાપપ્રશમનં સર્વાપસ્મારનાશનમ્ ॥ ૧૯૫ ॥

રાજચૈરારિ મૃત્યુનાં નાશનં જયવર્ધનમ્ ।
મારણે સપ્તરાત્રં તુ દક્ષિણાભિમુખો જપેત્ ॥ ૧૯૬ ॥

ઉદઙ્ મુખઃ સહસ્રં તુ રક્ષાણાય જપેન્નૈશિ ।
પઠતાં શ ृણ્વતાં ચૈવ સર્વદુઃખવિનાશકૃત્ ॥ ૧૯૭ ॥

ધન્યં યશસ્યમાયુષ્યમારોગ્યં પુત્રવર્ધનમ્ ।
યોગસિદ્ધિપ્રદં સમ્યક્ શિવં જ્ઞાનપ્રકાશિતમ્ ॥ ૧૯૮ ॥

શિવલોકૈકસોપાનં વાઞ્છિતાર્થૈકસાધનમ્ ।
વિષગ્રહક્ષયકરં પુત્રપૌત્રાભિવર્ધનમ્ ॥ ૧૯૯॥

સદા દુઃસ્વપ્નશમનં સર્વોત્પાતનિવારણમ્ ।
યાવન્ન દૃશ્યતે દેવિ શરભો ભયનાશકઃ ॥ ૨૦૦॥

તાવન્ન દૃશ્યતે જાપ્યં બૃહદારણ્યકો ભવેત્ ।
સહસ્રનામ નામ્ન્યસ્મિન્નેકૈકોચ્ચારણાત્પૃથક્ ॥ ૨૦૧॥

સ્નાતો ભવતિ જાહ્નવ્યાં દિવ્યા દૃષ્ટિઃ સ્થિરો ભુવિ ।
સહસ્રનામ સદ્વિદ્યાં શિવસ્ય પરમાત્મનઃ ॥ ૨૦૨॥

યોઽનુષ્ઠાસ્યતિ કલ્પાન્તે શિવકલ્પો ભવિષ્યતિ ।
હિતાય સર્વલોકાનાં શરભેશ્વર ભાષિતમ્ ॥ ૨૦૩॥

સ બ્રહ્મા સ હરિઃ સોઽર્કઃ સ શક્રો વરુણો યમઃ ।
ધનાધ્યક્ષઃ સ ભગવાન્ સચૈકઃ સકલં જગત્ ॥ ૨૦૪॥

સુખારાધ્યો મહાદેવસ્તપસા યેન તોષિતઃ ।
સર્વદા સર્વકામાર્થં જપેત્સિધ્યતિ સર્વદા ॥ ૨૦૫॥

ધનાર્થી ધનમાપ્નોતિ યશોર્થી યશ આપ્નુયાત્ ।
નિષ્કામઃ કીર્તયેન્નૈત્યં બ્રહ્મજ્ઞાનમયો ભવેત્ ॥ ૨૦૬॥

બિલ્વૈર્વા તુલસીપુષ્પૈશ્ચમ્પકૈર્બકુલાદિભિઃ ।
કલ્હારૈર્જાતિકુસુમૈરમ્બુજૈર્વા તિલાક્ષતૈઃ ॥ ૨૦૭॥

એભિર્નામ સહસ્રૈસ્તુ પૂજયેદ્ ભક્તિમાન્નરઃ ।
કુલં તારયતે તેષાં કલ્પે કોટિશતૈરપિ ॥ ૨૦૮॥

॥ ઇતિ આકાશભૈરવકલ્પે પ્રત્યક્ષસિદ્ધિપ્રદે ઉમામહેશ્વરસંવાદે
શ્રીમચ્છરભસહસ્રનામસ્તોત્રં (૩) સમ્પૂર્ણમ્ ॥

અશીતિરમોઽધ્યાયઃ

Entered by Ravin Bhalekar
Proofread by Ravin Bhalekar, Pallasena Narayanaswami ppnswami at gmail.com

*ShrI Sharabha Sahasranamastotra 3*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*